4. Hafta

**सिद्धार्थः**

एकदा बालः सिद्धार्थः प्रातः भ्रमणाय उपवनम् अगच्छत्। उपवने बहवः खगाः मधुरं कूजयन्ति स्म। सिद्धार्थः पक्षिणः अपश्यत्। तेषाम् कलरवं श्रुत्वा अतुष्यत्। किंचित् कालानन्तरं तस्य भ्राता देवदत्तः अपि उपवनम् आगच्छत्। सः शरेण आकाशे एकम् हंसम् अविध्यत्। शरेण विद्धः हंसः भूमौ अपतत्। सिद्धार्थः करुणया तं हंसं कुटीरम् आनयत्। तत्र हंसस्य परिचर्याम् अकरोत्। देवदत्तः स्वशरेण विद्धं हंसं ग्रहीतुं तत्र आगच्छत्। सिद्धार्थः देवदत्तम् अवदत् – "त्वम् अस्य हंसस्य घातकः, किन्तु अहम् तु अस्य रक्षकः। अतः अयम् मम हंसः।"

अथ सिद्धार्थस्य देवदत्तस्य च मध्ये विवादः अभवत्। देवदत्तः नृपस्य समीपम् अगच्छत्। सिद्धार्थः अपि तेन सह तत्र अगच्छत्। देवदत्तः नृपं सर्वं वृत्तान्तम् अकथयत् तथा सिद्धार्थः अपि स्वम् पक्षम् अवदत्। नृपः तम् सर्वम् अशृणोत् निर्णयं च अकरोत् – “अयं हंसः तु सिद्धार्थस्य एव, यतः सः अस्य रक्षकः।” उक्तम् हि “रक्षकः भक्षकात् श्रेष्ठः”